# ध्यानश्लोका:

## श्री गणेश

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥ १
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्॥ २

## श्रीसरस्वती

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमभि च शुकं पुस्तकं चापरेण।
भासा कुन्देन्दुशंखस्फटिकमणिनिभा भासमानासमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना॥ ३

## श्रीवाल्मीकि

कूजन्तं रामरामेति मधुरं मधुराक्षरं।
आरुह्य कविताशाखां वन्दे वाल्मीकि कोकिलम्॥ ४
वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः।
शृण्वन् रामकथानादं को न यातिपरां गतिम्॥ ५
यः पिबन् सततं रामचरितामृतसागरं।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम्॥ ६

## श्री हनुमान्

गोष्पदीकृतवाराशिं मशकीकृतराक्षसम्
रामायणमहामालारत्नं वन्देऽनिलात्मजम्। ७

अञ्जनानन्दनं वीरं जानकीशोकनाशनम्
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ ८

उल्लंघ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम्॥ ९

आञ्जनेयमतिपाटलाननं
काञ्चनाद्रिकमनीयविग्रहम्।
पारिजाततरुमूलवासिनं
भावयामि पवमाननन्दनम्॥ १०

यत्र यत्र रघुनाथकीर्तनं
तत्र तत्र कृतमस्तकाञ्जलिम्।
बाष्पवारिपरिपूर्णलोचनं
मारुतिं नमत राक्षसान्तकम्॥ ११

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि ॥ १२

।। श्री रामायणप्रार्थना ।।

यः कर्णाञ्जलि-संपुटैरहरहः सम्यक् पिबत्यादरात्
वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु ।
जन्मव्याधि-जराविपत्ति-मरणैरत्यन्तसोपद्रवं
संसारं स विहाय गच्छति पुमान् विष्णोः पदं शाश्वतम् ।।

## श्रीरामः

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम्।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परम्
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम्॥१८

वामे भूमिसुता पुरश्च हनुमान् पश्चात् सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च । १८
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नील-सरोज-कोमल-रुचिं रामं भजे श्यामलम् ।।
नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्र-यमानिलेभ्यो नमोऽस्तु चन्द्रार्क-मरुद्-गणेभ्यः ।।

## परायणसमापने अनुसन्धेयाः मंगलश्लोकाः

### (TO BE CHANTED AT THE END OF PARAYANAM)

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु॥ १

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः॥ २

अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तुपौत्रिणः।
अधनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥ ३

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥ ४

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि॥ ५